# Sri Maha Ganapathi Homam

## Laghu Paddhati (Short Procedure)

*By P.V.R. Narasimha Rao* (www.VedicAstrologer.org)

A separate document gives a detailed description of how to perform Maha Ganapathi Homam. This document puts all the mantras given in that document in one place. After one reads the other document and becomes proficient in the procedure, one can perform the homam by just referring to this document.

**Only Mantras (in Sanskrit)**

ॐ ऋद्ध्यास्याम हव्यैर्नमसोपसद्य । मित्रं देवं मित्रधेयं नो अस्तु । अनूराधान् हविषा वर्धयन्तः । शतं जीवेम शरदः सवीराः ।

ॐ केशवाय स्वाहा ।

ॐ नारायणाय स्वाहा ।

ॐ माधवाय स्वाहा ।

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं । प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशान्तये ॥

अगजानन पद्मार्कं गजाननमहर्निशं । अनेकदं तं भक्तानां एकदन्तं उपास्महे ॥

वक्रतुंड महाकाय कोटिसूर्यसमप्रभ । निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

ॐ नमो भगवते वासुदेवाय ।

ॐ श्री परमेश्वर प्रीत्यर्थम् श्री महागणपति प्रसाद सिद्ध्यर्थम् अद्य शुभदिने शुभमुहूर्ते श्री महागणपति होमकर्म यथाशक्ति करिष्ये ।

वं

गंगे च यमुने चैव गोदावरि सरस्वति।

नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु॥

अमृतं भवतु

फट्

ॐ भूर्भुवस्सुवरोम्।

अदितेऽनुमन्यस्व।

अनुमतेऽनुमन्यस्व।

सरस्वतेऽनुमन्यस्व।

देव सवितः प्रसुव।

चत्वारि शृंगास्त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य।

त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश।

एष हि देवः प्रदिशो नु सर्वाः पूर्वो हि जातः स उ गर्भे अन्तः।

स विजायमानः स जनिष्यमाणः प्रत्यङ्मुखास्तिष्ठति विश्वतोमुखः।

प्राङ्मुखो देव। हे अग्ने। ममाभिमुखो भव।

ॐ इन्द्राय नमः। ॐ अग्नये नमः। ॐ यमाय नमः। ॐ निर्ऋतये नमः। ॐ वरुणाय नमः। ॐ वायवे नमः। ॐ सोमाय नमः। ॐ ईशानाय नमः। ॐ अग्नये नमः। ॐ आत्मने नमः।

ॐ प्रजापतये स्वाहा। प्रजापतय इदं न मम।

ॐ इन्द्राय स्वाहा। इन्द्रायेदं न मम।

ॐ सोमाय स्वाहा। सोमायेदं न मम।

ॐ अग्नये स्वाहा। अग्नय इदं न मम।

आरंभप्रभृति एतत्क्षणपर्यन्तं मध्ये संभावित समस्त दोष प्रायश्चित्तार्थं सर्व प्रायश्चित्तं होष्यामि। ॐ भूर्भुवस्सुवः स्वाहा। प्रजापतय इदं न मम।

अस्य श्री महा गणपति मंत्रस्य गणक ऋषिः निचृद्गायत्री छन्दः श्री महा गणपतिर्देवता। ग्लां बीजं। ग्लीं शक्तिः। ग्लौं कीलकं। गां अंगुष्ठाभ्यां नमः। गीं तर्जनीभ्यां नमः। गूं मध्यमाभ्यां नमः। गैं अनामिकाभ्यां नमः। गौं कनिष्ठिकाभ्यां नमः। गः करतल करपृष्ठाभ्यां नमः। गां हृदयाय नमः। गीं शिरसे स्वाहा। गूं शिखायै वषट्। गैं कवचाय हुं। गौं नेत्रत्रयाय वौषट्। गः अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्बंधः।

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं ॐ हंसः सोऽहं सोऽहं हंसः महागणपतेः प्राण इह प्राणः। जीव इह स्थितः। सर्वेन्द्रियाणि वाङ्मनश्चक्षुः श्रोत्र जिह्वाघ्राण प्राणापानव्यानोदानसमानाः इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा। सान्निध्यं कुर्वन्तु स्वाहा। असुनी ते पुनरस्मासु चक्षुः पुनः प्राणमिह नो देहि भोगं। ज्योक्पश्येम सू र्यमुच्चरन्तमनुमते मृळया नः स्वस्ति। आं ह्रीं क्रों क्रों ह्रीं आं। आं ह्रीं क्रों क्रों ह्रीं आं। आं ह्रीं क्रों क्रों ह्रीं आं। आं ह्रीं क्रों क्रों ह्रीं आं। महागणपति प्राणशक्त्यै नमः। धूपं दीपं घृतमधु निवेदनं समर्पयामि।

आवाहितो भव। स्थापितो भव। सन्निहितो भव। सन्निरुद्धो भव। अवकुंठितो भव। देव प्रसीद प्रसीद। देव सर्व जगन्नाथ यावद्धोमावसानकम्। तावत्त्वं प्रीतिभावेन मूर्तौ अग्नौ च सन्निधिं कुरु।

ॐ श्रीं ह्रीं क्लीं श्री महागणपतये नमः। आसनं समर्पयामि।

ॐ श्रीं ह्रीं क्लीं महागणपतये पादयोः पाद्यं समर्पयामि।

ॐ श्रीं ह्रीं क्लीं महागणपतये हस्तयोः अर्घ्यं समर्पयामि।

ॐ श्रीं ह्रीं क्लीं महागणपतये मुखे शुद्धाचमनीयं समर्पयामि।

ॐ श्रीं ह्रीं क्लीं महागणपतिं स्नपयामि। स्नानानन्तरं आचमनीयं समर्पयामि।

ॐ श्रीं ह्रीं क्लीं महागणपतये वस्त्राणि धारयामि।

ॐ श्रीं ह्रीं क्लीं महागणपतये यज्ञोपवीतं समर्पयामि।

ॐ श्रीं ह्रीं क्लीं महागणपतये आभरणानि समर्पयामि।

ॐ श्रीं ह्रीं क्लीं महागणपतये गन्धान् धारयामि। हरिद्रा कुंकुमं समर्पयामि। अक्षतान् समर्पयामि।

ॐ श्रीं ह्रीं क्लीं महागणपतये पुष्पैः पूजयामि। ॐ सुमुखाय नमः। ॐ एकदन्ताय नमः। ॐ कपिलाय नमः। ॐ गजकर्णकाय नमः। ॐ लंबोदराय नमः। ॐ विकटाय नमः। ॐ विघ्नराजाय नमः। ॐ धूमकेतवे नमः। ॐ गणाध्यक्षाय नमः। ॐ फालचन्द्राय नमः। ॐ गजाननाय नमः। ॐ वक्रतुंडाय नमः। ॐ शूर्पकर्णाय नमः। ॐ हेरंबाय नमः। ॐ स्कन्दपूर्वजाय नमः। ॐ सिद्धिविनायकाय नमः। ॐ श्री महागणाधिपतये नमः।

ॐ श्रीं ह्रीं क्लीं महागणपतये धूपं आघ्रापयामि।

ॐ श्रीं ह्रीं क्लीं महागणपतये दीपं दर्शयामि। आचमनीयं समर्पयामि।

ॐ श्रीं ह्रीं क्लीं महागणपतये नैवेद्यं समर्पयामि। ताम्बूलं समर्पयामि।

ॐ श्रीं ह्रीं क्लीं महागणपतये कर्पूरनीराजनं समर्पयामि।

ॐ श्रीं ह्रीं क्लीं महागणपतये मन्त्रपुष्पं समर्पयामि।

ॐ श्रीं ह्रीं क्लीं महागणपतये प्रदक्षिण नमस्काराण् समर्पयामि।

ॐ स्वाहा। ॐ श्रीं स्वाहा। ॐ श्रीं ह्रीं स्वाहा। ॐ श्रीं ह्रीं क्लीं स्वाहा। ॐ श्रीं ह्रीं क्लीं ग्लौं स्वाहा। ॐ श्रीं ह्रीं क्लीं ग्लौं गं स्वाहा। ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये स्वाहा। ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद स्वाहा। ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं स्वाहा। ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा स्वाहा।

स्वाहा॑॑

वौषट्

ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा।

ॐ ग॒णानां॑॑ त्वा ग॒णप॑तिꣳ हवामहे क॒विं॑ क॑वी॒नामु॑पमश्र॑वस्तमं। ज्ये॒ष्ठराजं॒ ब्रह्म॒णां ब्रह्मणस्प॑त॒ आ नः शृ॒ण्वन्नू॒तिभि॑स्सी॒द॑ सादनं॑॑॥ स्वाहा॑॑।

ॐ पूर्णाहुतिं उत्तमं जुहोति सर्वं वै पूर्णाहुतिः। सर्वमेवाप्नोति अतो इयं वै पूर्णाहुतिः। अस्यामेव प्रतितिष्ठति। ॐ श्रीं ह्रीं क्लीं महागणपतये पूर्णाहुतिं समर्पयामि।

ॐ शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च मऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे ॥

ॐ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वयꣳ स्याम पतयो रयीणाम् । स्वाहा । प्रजापतय इदं न मम ॥

ॐ भूः स्वाहा । अग्नय इदं न मम ॥

ॐ भुवः स्वाहा । वायव इदं न मम ॥

ॐ सुवः स्वाहा । सूर्यायेदं न मम ॥

यदस्य कर्मणोऽत्यरीरिचं यद्वान्यूनमिहाकरम् । अग्निष्टत् स्विष्टकृद्विद्वान् सर्वं स्विष्टं सुहुतं करोतु स्वाहा । अग्नये स्विष्टकृत इदं न मम ॥

ॐ भूर्भुवस्सुवः स्वाहा । प्रजापतय इदं न मम ॥

अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु । अग्ने तदस्य कल्पय त्वꣳ हि वेत्थ यथातथम् । स्वाहा । अग्नय इदं न मम ॥

पुरुषसंमितो यज्ञो यज्ञः पुरुषसंमितः । अग्ने तदस्य कल्पय त्वꣳ हि वेत्थ यथातथम् । स्वाहा । अग्नय इदं न मम ॥

यत्पाकत्रा मनसा दीनदक्षा न । यज्ञस्य मन्वते मर्तासः । अग्निष्टद्धोता क्रतुविद्विजानन् । यजिष्ठो देवान् ऋतुशो यजाति । स्वाहा । अग्नय इदं न मम ॥

ॐ भूः स्वाहा । अग्नय इदं न मम ॥

ॐ भुवः स्वाहा । वायव इदं न मम ॥

ॐ सुवः स्वाहा । सूर्यायेदं न मम ॥

अस्मिन् होमकर्मणि मध्ये संभावित समस्त मंत्रलोप तंत्रलोप क्रियालोप भक्तिलोप श्रद्धालोप नियमलोप द्रव्यलोपादि समस्त दोष प्रायश्चित्तार्थं सर्व प्रायश्चित्ताहुतिं होष्यामि । ॐ भूर्भुवस्सुवः स्वाहा । प्रजापतय इदं न मम ॥

ॐ श्री विष्णवे स्वाहा । विष्णवे परमात्मन इदं न मम ॥

ॐ नमो रुद्राय पशुपतये स्वाहा। रुद्राय पशुपतय इदं न मम॥

सप्त ते अग्ने समिधः सप्तजिह्वाः सप्त ऋषयस्सप्तः धाम प्रियाणि। सप्त होत्रा सप्त धात्वा यजन्तिसप्तयोनीरापृणस्वा घृतेन स्वाहा। अग्नये सप्तवत इदं न मम॥

अदितेऽन्वमंस्थाः।
अनुमतेऽन्वमंस्थाः।
सरस्वतेऽन्वमंस्थाः।
देव सवितः प्रासावीः।

ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा। ॐ श्री महागणपतिं तर्पयामि।

ॐ श्री महागणपति पार्षदेभ्यो नमः। बलिं समर्पयामि।

अस्मान्मूर्तेश्च अग्नेश्च श्रीमहागणपतिं यथास्थानं प्रतिष्ठापयामि।

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम। अग्नये नमः॥

मंत्रहीनं क्रियाहीनं भक्तिहीनं हुताशन। यद्धुतं तु मया देव परिपूर्णं तदस्तु ते॥
प्रायश्चित्तान्यशेषाणि तपः कर्मात्मकानि वै। यानि तेषामशेषाणां श्री कृष्णस्मरणं परं॥ श्री कृष्ण कृष्ण कृष्ण।
कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात्। करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि॥

अनेन होमेन भगवान् सर्वात्मकः श्रीमहागणपतिः प्रीयताम्। ॐ तत्सत्। सर्वम् श्री कृष्णार्पणमस्तु। ॐ शान्तिः शान्तिः शान्तिः।

## गणपत्यथर्वशीर्षम्

**गणेशोपनिषत्**

ॐ नमस्ते गणपतये। त्वमेव प्रत्यक्षं तत्त्वमसि। त्वमेव केवलं कर्तासि। त्वमेव केवलं धर्तासि। त्वमेव केवलं हर्तासि। त्वमेव सर्वं खल्विदं ब्रह्मासि। त्वं साक्षादात्मासि नित्यम्॥ स्वाहा।

ऋतं वच्मि। सत्यं वच्मि॥ स्वाहा।

अव त्वं मां। अव वक्तारं। अव श्रोतारं। अव दातारं। अव धातारं। अवानूचानमवशिष्यं। अव पश्चात्तात्। अव पुरस्तात्। अवोत्तरात्तात्। अव दक्षिणात्तात्। अव चोर्ध्वात्तात्। अवाधरात्तात्। सर्वतो मां पाहि पाहि समन्तात्॥ स्वाहा।

त्वं वाङ्मयस्त्वं चिन्मयः। त्वमानन्दमयस्त्वं ब्रह्ममयः। त्वं सच्चिदानन्दाद्वितीयोऽसि। त्वं प्रत्यक्षं ब्रह्मासि। त्वं ज्ञानमयो विज्ञानमयोऽसि॥ स्वाहा।

सर्वं जगदिदं त्वत्तो जायते। सर्वं जगदिदं त्वत्तस्तिष्ठति। सर्वं जगदिदं त्वयि लयमेष्यति। सर्वं जगदिदं त्वयि प्रत्येति। त्वं भूमिरापोऽनलोऽनिलो नभः। त्वं चत्वारि वाक्पदानि॥ स्वाहा।

त्वं गुणत्रयातीतः। त्वं अवस्थात्रयातीतः। त्वं देहत्रयातीतः। त्वं कालत्रयातीतः। त्वं मूलाधारस्थितोऽसि नित्यं। त्वं शक्तित्रयात्मकः। त्वां योगिनो ध्यायन्ति नित्यं। त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवस्सुवरोम्॥ स्वाहा।

गणादिं पूर्वमुच्चार्य वर्णादींस्तदनन्तरं। अनुस्वारः परतरः। अर्धेन्दुलसितं। तारेण ऋद्धं। एतत्तव मनुस्वरूपं। गकारः पूर्वरूपं। अकारो मध्यम रूपं। अनुस्वारश्चान्त्यरूपं। बिन्दुरुत्तररूपं। नादः सन्धानं। सꣳहिता सन्धिः। सैषा गणेशविद्या। गणक ऋषिः। निचृद्गायत्री छन्दः। गणपतिर् देवता। ॐ गं गणपतये नमः। ॐ गं गणपतये नमः। ॐ गं गणपतये नमः॥ स्वाहा।

एकदन्ताय विद्महे। वक्रतुण्डाय धीमहि। तन्नो दन्तिः प्रचोदयात्॥ स्वाहा।

एकदन्तं चतुर्हस्तं पाशमंकुशधारिणं। रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजं। रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससं।
रक्तगन्धानुलिप्तांगं रक्तपुष्पैः सुपूजितं। भक्तानुकंपिनं देवं जगत्कारणमच्युतं। आविर्भूतं च सृष्ट्यादौ प्रकृतेः
पुरुषात्परं। एवं ध्यायति यो नित्यं स योगी योगिनां वरः॥ स्वाहा।

नमो व्रातपतये। नमो गणपतये। नमः प्रमथपतये। नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताय
वरदमूर्तये नमः॥ स्वाहा॥